# 2021

## SANSKRIT — HONOURS

**Paper : CC-7**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Section – A**

**(Marks : 10)**

**Unit II**

1. अधोलिखितयोः ***कस्यचिदेकस्य*** संस्कृतभाषया देवनागरलिप्या च सप्रसङ्गं व्याख्या कार्या। 6×1

(a) वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्॥

(b) धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥

2. निम्नलिखितेषु ***प्रश्नद्वयम्*** अतिसंक्षेपेण संस्कृतभाषया देवनागरलिप्या च समाधेयम्। 2×2

(a) मिताक्षरामनुसृत्य गुणधर्मविषय उल्लेखनीयः।

(b) मिताक्षरा केन रचिता? कस्य ग्रन्थस्थ टीकेयम्?

(c) "धर्ममूलमिदं स्मृतम्" – इत्यस्य तात्पर्यं संक्षेपेण उल्लेखनीयम्।

(d) विष्णुपुराणमनुसृत्य धर्मस्य वैविध्यं विव्रियताम्।

**Section – B**

**(Marks : 30)**

**Unit I & II**

**(Marks : 12)**

3. अधोलिखितयोः यथेच्छं ***कस्यचिदेकस्य*** उत्तरं संस्कृतभाषया देवनागरलिप्या च लेखनीयम्।

(a) "ब्राह्मणो॑ऽस्य मुख॑मासीद् बा॒हू रा॑ज॒न्यः॑ कृतः।
ऊ॒रु तद॑स्य॒ यद्वैश्यः॑ प॒द्भ्यां शू॒द्रो अ॑जायत॥"
–मन्त्रोऽयं कुत्र समुपलभ्यते? अस्य मन्त्रस्य अर्थं निरूप्य तत्रत्य सामाजिकतात्पर्यम् आलोच्यताम्। 1+4+5

**Please Turn Over**

(b) "चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।
तस्य कर्तारमपि मां विद्धयकर्तारमव्ययम्॥"
–वचनमिदं कुत्र उपलभ्यते? कोऽत्र वक्ता? वचनस्यास्य सामाजिकतात्पर्यं सविशदम् आलोच्यताम्। 1+1+8

**4.** निम्नप्रदत्तेषु ***प्रश्नद्वयम्*** अतिसंक्षिप्ततया समाधेयम्। (न्यूनत ***एकस्योत्तरं*** संस्कृतभाषया देवनागरलिप्या च लेखनीयम्।) 1×2

(a) "अहिंसा सत्यमक्रोधो वृत्तिदायानुपालनम्।
भरणं पुत्रदाराणां शौचमद्रोह एव च॥"
– अत्र अहिंसादयः गुणाः केषां कर्तव्यत्वेन विहिताः?

(b) महाभारते ब्राह्मणकन्यायां क्षत्रियाज्जातः पुत्रः कः अभिधीयते?

(c) "एते मतिमतां श्रेष्ठ वर्णसंकरजाः प्रभो" – इत्यस्य तात्पर्यम् उल्लिख्यताम्।

(d) पूर्वं पूर्वं वर्णमापद्यते "जातिपरिवृत्तौ" – अत्र "जातिपरिवृत्तौ" इति पदेन कोऽवबुध्यते?

**Unit III & IV**

**(Marks : 18)**

**5.** बृहत्संहिता केन विरचिता? ग्रन्थस्यास्य कस्मिन् अध्याये स्त्रीप्रशंसा विहिता? अध्यायस्यास्य भवदीयपाठ्यांशमवलम्ब्य स्त्रीप्रशंसायाः पर्यालोचनं विधीयताम्। 1+1+8

***अथवा***

"न दृष्टपूर्वा चान्यत्र साहमद्य सभां गता॥" – कोऽत्र वक्ता? कस्मै वा वचनमिदं कथितम्? प्रसङ्गेऽस्मिन् वक्तुः वचनानि समासेन उपस्थाप्य तदीयं चारित्रिकं वैशिष्टञ्च पर्यालोच्यताम्। 1+1+6+2

**6.** अधोलिखितेषु ***विषयद्वयम***धिकृत्य टीका कार्या। 4×2

(a) ब्रह्मचर्याश्रमः

(b) उपनयनसंस्कारः

(c) जातकर्मविधिः

(d) मोक्षः

## Section – C
### (Marks : 10)
### Unit I

**7.** अधोलिखितेषु यथेच्छ***मेकस्य*** संस्कृतभाषया देवनागरलिप्या च व्याख्या कार्या। 6×1

(a) आ त्वाहार्षमन्तरभूर्ध्रुवस्तिष्टाविचाचलत्।
विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्टमधि भ्रशत्॥

(b) इहैवैधि माप च्योष्टाः पर्वतइवाविचाचलिः।
इन्द्रइवेह ध्रुवस्तिष्टेह राष्ट्रमु धारय॥

**8.** अधोलिखितेषु यथेच्छं ***प्रश्नचतुष्टयस्य*** उत्तरम् अतिसंक्षेपेण प्रदीयताम् (एतेषु न्यूनत **एकस्य** उत्तरं संस्कृतभाषया देवनागरलिप्या च लेखनीयम्)। 1×4

(a) "सभा च मा" – इत्यत्र सभापदस्य कोऽर्थः?

(b) विदथशब्देन किमवगम्यते?

(c) राजा केन यागेन सम्राड् भवितुमर्हति?

(d) क्षतृपदस्य कोऽर्थः?

(e) "राजकृतः" इति पदेन कोऽवबुध्यते?

(f) "अथो त इन्द्रः ______ बलिहृतस्करत्" – इत्यत्र रिक्तस्थानं पूरयितव्यम्।

## Section – D
### (Marks : 15)
### Unit I

**9.** अधोलिखितेषु ***कस्यचिदेकस्य*** उत्तरं संस्कृतभाषया देवनागर्या लिप्या च लेखनीयम्।

(a) विजिगीषोः राज्ञः षाड्गुण्यनीतिः वैशद्येन वर्ण्यताम्। 10

(b) उपायचतुष्टयं किम्? तेषाम् उपायद्वयस्य सविशदं पर्यालोचनं विधीयताम्। 2+8

**10.** निम्नलिखितेषु ***पञ्चप्रश्नाः*** समाधेयाः। (**एकस्य** उत्तरं संस्कृतभाषया देवनागरलिप्या च लेखनीयम्) 1×5

(a) कौटिल्यस्य मते सप्ताङ्गराष्ट्रस्य तृतीयम् अङ्गं किम्?

(b) "मित्रामित्र" इत्यनेन कोऽवबुध्यते?

(c) मध्यमशब्दस्य अर्थः कः?

(d) उत्साहशक्तेः प्रयोजनं किम्?

(e) कस्तावत् उदासीनः राजा?

(f) राजमण्डलस्य मूलप्रकृतयः काः?

(g) कः पार्ष्णिग्राहः?

---